श्रीगणेशायनमः॥ श्रीशांबायैनमः॥ श्रीघृसृणेश्वरायनमः॥ ऋषयऊचुः॥ स्वामिन्सत्यवतीसूनोशिष्योसिमुनिसत्तम॥ स
ह्याद्रिसंस्थितानांचतीर्थानांदेवतात्मनां १ तपस्विनांकिंनराणांमनुजानांतथैवच। उपाख्यानानिसत्पुण्यानिश्रुतानित्वत्प्र
सादतः॥२॥ कथास्त्वद्वदनांभोजप्रसृताभूरिभूतयः। नतृप्तिमधिगच्छामःपायंपायंसुधामिव॥३॥ अधुनाश्रोतुमिच्छामो
शिवालयसमुद्भवं। एलानद्यास्तुमाहात्म्यंश्रीपर्णस्यनदस्यच ४॥ सूतउवाच॥ शृणुध्वंमुनयःसर्वेपुण्यतीर्थोत्तमंभुवि
वक्ष्येसर्वंप्रयत्नेनशृण्वतांमुनिपुंगवाः॥५॥ इहकामुष्मिकंयत्रफलंभूमिनवेन्नृणां। तीर्थानामपितीर्थंवैष्णवानांचवैष्ण
वं॥६॥ क्षेत्राणामपियत्क्षेत्रंशिवानामपियच्छिवं। आद्यंत्वाद्यतमंलोकेसारंसर्वोपजीविनां॥७॥ एकंपुण्यतमंलोकेसर्वद
यंशिवालयं। गयागंगाकुरुक्षेत्रंकाशीनैमिषकाननं॥८॥ वेणीचयमुनारेवाक्षिप्राचैवसरस्वती। कृष्णातापीपयोष्णीच
गोदातुंगाचभद्रिका॥९॥ विशालंवरजंसेतुंसोरंपुष्करंचकुशस्थलीं॥१०॥ तीर्थंतुदृश्यतेकिंचित्पातालेचभुवादिवि। तेषामेकोत्तमं
द्वियवाधिक्यंशिवालयं॥११॥ वैवस्वतेनविज्ञप्तःपुराब्रह्माचतुर्मुखः। ब्रह्मन्मर्त्यास्तरंतीहपापिनोपिशिवालये॥१२॥ दर्शना
त्स्पर्शनात्स्नानादंबुपानान्निषेवनात्। दुष्टात्मानोदिवंयांतिनस्यांतिभुविपापिनः॥१३॥ स्वामिद्रोहकृतघ्नायेस्तेयाविश्वासघातकाः
सुरापाब्रह्महंतारोगुरुघ्नागुरुतल्पगाः॥१४॥ तेपिब्रह्मन्दिवंप्रापाःशिवालयनिमज्जनात्। विनायज्ञैर्विनादानैस्तीर्थैरन्यै
विनानराः। शिवालयस्यपोतेनतेरुःसंवंभवार्णवं॥१५॥ कैलासादपियद्दृष्टंशिवायास्यशिवस्यच। सह्याद्रिसंस्थितंतीर्थंतज्ज्ञा
नीहिशिवालयं॥१६॥ कृतेगव्यूतिसंख्याकंत्रेतायांतुतदर्धकं। द्वापारेअर्धसंख्याकंषट्पंचांतरंकलौ। कृतेस्वर्णनिभंतोयंत्रे
तायांताम्ररूपिच। द्वापारेनीलवर्णंतुकलौतोयंसपिच्छलं॥१८॥ ब्रह्मणेवपुराविष्णोर्विष्णुनापिशिवस्यच। शिवेनप्रणयेनेहकथितं
मुनिपुंगवे॥१९॥ तेनेदंकथितंसर्वंपृच्छतोपिममाग्रतः। इत्याकर्ण्यवचस्तस्यइदमूचुर्महर्षयः॥२०॥ मत्स्यामवनता। स्तुत्वाप्रसन्नमुख

पंकजा ॥ ऋषय ऊचुः ॥ साधुसाधु महाप्राज्ञ व्यासस्नो महामते । किमानंदपयःपूरप्रवाहो भवन्मुखात ॥ २२ ॥ अस्माकं सफलं जन्म
जं । वित्तं सफलं जीवितं । ऋषिणा कथितं यत्ते प्राशस्त्यं च शिवालयं ॥ २३ ॥ किमु कल्पद्रुमः प्राप्तः किमु लब्धः सुधानिधिः । किं स्फूर्तनो भग
न्योति श्रवणेन शिवालयात ॥ २४ ॥ केचनत्र सकाराः संति मुनयः केव संति च । शिवालयेक्ता तीर्थानि स्वामिन्ब्रूहि सविस्तरं ॥ २५ ॥ सूत उवाच ॥
यूयमाकर्ण्यतां भक्त्या शिवगाथामगायत । नारदो नंदिकेशाय भृंगी चंडी गणेश्वराः ॥ २६ ॥ अन्येपि प्रमथाः सर्वे भृगुवेतालकंबलाः शि
वालयस्य माहात्म्यं त्रिषु लोकेषु विश्रुतं ॥ २७ ॥ श्रुतं नेत्योः सत्यवतीसुतेनाकथितं मम । वच्मि सर्वं प्रयत्नेन आदिमध्यावसानकं ॥ २८ ॥ व
संति त्रिदशाः सर्वे भूमौ बलिनिकेतने । सदैव तेव संत्यत्र शिवालयसमीपतः ॥ २९ ॥ तीर्थानां यत्र तीर्थानि लिंगानां लक्षमेव च । सिद्धर्षीणां च
लक्षं तु साक्षील क्षगणेश्वराः ॥ ३० ॥ देवा यत्रत्यपाषाणाः सलिलं जान्हवीजलं । वेदः श्रुतिसमाः गाथाः सदैव हि शिवालये ॥ ३१ ॥ यत्र गोष्ठिः
स्तुतिः शंभोस्तीर्थयात्रा च चालनं । निजाहारस्तु नैवेद्यं निद्राध्यानं शिवालये ॥ ३२ ॥ यत्र निद्रा च जागर्तिः शृंगारः शिवपूजनं । भुक्तिस्त्रय
तो मुक्तिः ततोधिकं शिवालये ॥ ३३ ॥ अखिलं दंड यतो लिंगं गंगा मृत्तिकापमं वपुः । जीवो हि ईश्वरः साक्षात् शिवालयनिवासिनां ॥ ३४ ॥ इतो लिंग
मितो विष्णुरितो दुर्गा गणेश्वरः । अदेवालोकि कीदृशिः पथि नास्ति शिवालये ॥ ३५ ॥ शिवालयं कृते नाम शिवस्थानं परे युगे । तस्माद्
लापुरं नाम नागरूढनं कलौ युगे ॥ ३६ ॥ विदादेवर्षयः छंदाः मतो श्चत्वार एव हि । ब्राह्मणाश्च चतुर्वेदाः स्तिष्ठंति मुनयोपि च ॥ ३७ ॥
नैमिषे यानि लिंगानि केदारे दारुकावने । श्रीशैले यानि लिंगानि तान्येव हि शिवालये ॥ ३८ ॥ सांप्रतं शिवया शंभुः कैलासं सेवसादिवा शिवया
सहितः शंभुर्निशि दृशः शिवालये । यत्रास्ति योगिनीचक्रं यत्र पीठं महासनं । बीजमुद्रादिसंकेतैः समेतं तु शिवालयं ॥ ४० ॥ यत्र नाथक्रमा
भ्यासयोगसिद्धासनक्रियाः । मंडलोद्धारसंमंत्रान्निरीक्षास्ति शिवालये ॥ ४१ ॥ षडंबा मातरः सप्त नव दुर्गाष्टभैरवाः । कुमारि बटुका
श्वेतप्रशस्ताः स्युः शिवालये ॥ ४२ ॥ साध्या राधक मंत्रज्ञाः धातंगरसयाज्ञिनः । भुक्तिमुक्तिप्रदं दीप । स्थानमेकं शिवालयं ॥ ४३ ॥ घृ

घृणेशः शिवो विष्णुश्चक्रो योगेश्वरी शिवा । एलायत्र नदी गंगा किं वर्ण्यते शिवालयं ॥ ४४ ॥ जन्मजरामरणभयाद्यत्र स्वर्गेंद्रस्य भयादपि । परित्यज्य भ
यं सर्पास्तेनागास्तु शिवालये ॥ ४५ ॥ यदि जिह्वायुतं वक्त्रं यदानंतस्य वा युगं । सदास्वारूढं भवेद्देवं तदा वर्ण्यं शिवालयं ॥ ४६ ॥ इति श्रुत्वा म
हावीर्यं महात्म्यं मुनिपुंगवात् । मुनिवर्यप्रसादेन मुदा हर्षमवापतुः ॥ ४७ ॥ ननर्तं प्रजहर्षातं शिवगाथामगायत । सविस्मयापुलक्तपनाशि
वदासाबभूवतुः ॥ ४८ ॥ ॥ इति श्रीपद्मपुराणे सह्याद्रिखंडे त्रिभतीतिमध्याये शिवालयमहात्म्ये शिवालयप्रशंसानाम प्रथमोध्यायः
॥ १ ॥ ऋषय ऊचुः ॥ सर्वज्ञोसि मुनिश्रेष्ठ सर्वेषां शुनिपुंगव । अनेकानि च तीर्थानि कथितानि बहूनि च ॥ १ ॥ श्रूयमाकर्ण्यतां भक्त्या पूर्वं श्रुतं
त्वयानघ । अधुना श्रोतुमिच्छामि श्रद्धामूलस्य कारणं ॥ २ ॥ वद सर्वं प्रयत्नेन प्रसन्नोसि यदा मयि ॥ सूत उवाच ॥ श्रूयतामिदमाख्यानं
भक्तिमूलस्य कारणं । व्यासेन कथितं यन्मे तत्तुभ्यं कथयाम्यहं ॥ ३ ॥ श्रध्यायः शृणोत्येव भक्त्या परमया युतः । विश्वासादास्तिका
द्वावा फलं प्राप्नोति यत्नतः ॥ ४ ॥ तीर्थमंत्रं व्रतं श्रेयः छलादाकर्णयंति ये । पाखंडिनश्च ते पापाः गंतुकामास्तु दुर्गतिं ॥ ५ ॥ गुरुमा
तृपितृस्नात ब्रह्मस्त्रीबालघातिनां । तत्समस्तं विजानीहि तीर्थमाहात्म्यनिंदकान् ॥ ६ ॥ वरं तु जननी वंध्या जनको वा नपुंसकः । व
रं श्रवतु तद्गर्भो धर्मयो श्रद्धया भवेत ॥ ७ ॥ गुरुस्त्री भगिनी कन्या स्नुषा संबंधिनी वधूः । कला सालोकने पापं तच्च नास्तिकचेतसां ॥ ८ ॥
विश्वासस्थापितं हस्ते वस्त्रधातुधनादिकं । वस्तुधान्यादिहर्तृभ्यस्तेभ्यो श्रद्धालयोधिकाः । कृतघ्नं तिहं तिसं विश्वस्तं च तस्य जंति
ये । दुहंति स्वामिनं तेभ्यः श्रद्धाहीनो नरोधिकः ॥ १० ॥ दंपत्योः पुत्रपित्रोर्वा मित्रयोः स्वामिभृत्ययोः । हरीशयोस्तु यद्द्वंद्वं तीर्थनिंदा
त्मनां तु तत ॥ ११ ॥ गुरुं हुंकृत्य यत्पापं निर्भर्त्स्य पितरौ च यत । स्मृतिविस्मृत्य संमंत्रं यत्पापं साधुनिंदके ॥ १२ ॥ सत्कलेत्रं तु सत्पुत्रं त्यज
तां कुलदैवतं । कुलाचारं कुलस्त्रीयं यत्पापं तच्च निंदके ॥ १३ ॥ अतिथिं विमुखीकृत्य पित्रोराज्ञां विलंघनं । ऋणं विलुप्य यत्पापं स्यात्तदे
वातिनिंदके । विप्रदाता गवां हंता दुष्टो नात्मघातकः । क्षेत्रदारगहीयः स्याद्श्रद्धालस्तत्समः ॥ १४ ॥ यश्च क्षीरतलं छेदयत्कीर्तन

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

विनाशने भग्नेजलाशयेयच्चयच्चसीमावलंघने १५ लाक्षालवणमांसांबुकन्यागोरसविक्रये पलांडूविड्वराहादिगृंजाककुट
भक्षणे १६ अभक्षभक्षणेपेयपानेगम्यागमेचयत् अप्रतिग्रहणग्राह्येअवाच्यवदनेचयत् १७ अदेयदानेयत्पापंमसं
ग्राह्यस्यसंग्रहे तत्पापंचभवेत्तेषांयेचैवोपहासिनः १८ माकुरुतात्रतीर्थानांमाविश्वासमुनीश्वराः विशेषेणशिवस्यास्य
विश्वासोस्मिन्शिवालये १९ ऋषयऊचुः तातदेवहृतस्याघकश्मलंनोहृदिस्थितं शिवालयप्रसंगेनश्रध्याधिक्यंप्रसंशितं
२० सूतउवाच श्रधयैवैहिकंलोके श्रध्यामुष्मिकंफलं। श्रधयासुकृतंलोके श्रधयासंल्पमाप्यते २१ महादानप्रद
तेयद्बहुस्वर्णेकृतेक्रतौ चरितेतुव्रतव्रातेतत्पुण्यंश्रधयाभवेत् २२ परब्रह्मणियध्यानेसन्मंत्रस्यजपेचयत् अजंगम
परित्राणेदीनार्ताश्वासनेसदा २३ पतिताक्षरणेदुष्टदंडनेसाधुपालने कपिलास्पर्शनेश्वत्थसेवनेनगंसुदर्शने २४ श्री
कृष्णेपूजनेपुण्यं शालिग्रामशिवार्चने शक्तिमाराधनेसर्वदेवकृत्येनगाभिते २५ विष्णुपादोदकेमिश्रतुलस्यंबुनिषेवने गंगा
वगाहनेतीर्थस्नानेमाघेचकार्तिके २६ दीपाराध्येष्टदीपदानेचैवशिवालये व्यतीपातेप्रदत्तेपसंक्रांत्यंतसमर्पितं २७ शिव
रात्रौशिवस्तुत्यांजागरेहरिवासरे दानेगोभूहिरण्यादिजलान्नगजवाजिनां २८ मोक्षणेवंदिशालायांरक्षणेचद्विजन्मनां
मासोपवासिनोस्वाध्यायेचपाराभिवंदने २९ सूर्येंदुग्रहणेदानेद्विजानांगुरुभोजने सर्वभूतसमत्वेचब्रह्मचर्यव्रतेचयत्
हरिशंकरयात्रायांकन्योद्वाहेतुयत्फलं एकभुक्तेचसोमेचअमायांशिवदर्शने यद्वापिखननेनद्यास्तरोःसंरोपणेचयत्
यद्गवांप्राग्यदानेपुष्पवीड्डसंपूजनेचयत् अतिथ्यर्चनेपुण्यंपितृसंतर्पणेचयत् एकैकस्मिंस्कृतेपुण्यंशिवदासाःपृथक्पृथ
क् वाराणस्युत्तरेसाक्षादीशान्येचगयास्वयं गंगाब्धिसंगमःपूर्वेविरजंवन्हिदिक्स्थितं ३० विशालंदक्षिणस्यांनासि
केनैर्ऋतेनर्प वारुणद्वारवत्येषा रेवावायव्यकोणके ३१ एवमष्टौकृतेर्थानिपरितःशिवालये श्रृणुध्वंमुनयःपूर्ववृत्तसा

न्मनुखाच्छुभं ॥३२॥ ॥ इतिश्रीपद्मपुराणेसह्याद्रिखंडेशिवालयमहात्म्येश्रध्याप्रशंसानामद्वितीयोध्यायः ॥ २ ॥
ऋषयऊचुः ॥ ॥ अस्मिन्शिवालयेपुण्येयात्राविधिकथंभवेत् विधिनाकेनकर्तव्यंकेषुमार्जनमाचरेत् १ ॥ सूतउवाच ॥
ब्राह्मेमुहूर्तेचोत्थायशिवंशिवमितिब्रुवन् पूजासंभारमादाययदानसंभारमेवच २ शिवालयेस्कतीर्थेचप्रगत्वाब्राह्मणैःसह
सविलंकारयेत्स्नानंक्रियासाकंशिवालये ३ धूम्रेणेशंनमस्कृत्यगणेशंसर्वसाक्षिणं मुंडनंचोपवासंचतीर्थश्राद्धंकथंचरेत् प्र
दद्यात्तीर्थगुरवेसवत्सांगांपयस्विनीं यथावत्क्रियतेस्नानंदानंतीर्थेषुचाष्टसु ५ धूम्रेशंतुसंपूज्यपूजाद्रव्यैरनेकशः नमस्कृ
त्यततोगच्छेस्वर्णजालेश्वरंप्रति ६ महालिंगंचसिद्धेशंचित्रेशंत्रिपुरांतकं कपिलेशंततोदृष्ट्वापंचपातकनाशनं ७ गणाधीशं
चलक्षेशंनागेशंचतथैवहि हेरंबांचषडंबांचनृसिंहंसत्यमातृकाः भैरवंक्षेत्रपालंचदृष्ट्वानतुदूयतेभवः ८ धारातीर्थे
प्रगच्छेच्चस्नानंकुर्याद्यथाविधि माध्यान्हिकंप्रकुर्वीततर्पणंतिलपूर्वकं ९ धारायांस्नातियोमर्त्योदानंवाकुरुतेजपं पितृणां
तर्पणंहोमंतत्सर्वंनास्तिभूतले १० हनुमानंनमस्कृत्यनागेशंलक्ष्मनायकं ततःसंप्रार्थयेदेवंनित्ययात्रानुसाक्षिणं ११ ग
णाधीशनमस्तेस्तुलंबोदरगजानन मयाकृतातुयायात्रासासफलंवरदप्रद १२ ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्याल्व
मेविधिः अथवानित्ययात्रावैमुंडनोपासवर्जिता १३ येकुर्वंतिसदाभक्त्यानतेवैदुःखभागिनः भुक्त्वाथेप्सितान्भोगानं
तेसायुज्यमाप्नुयात् ॥ ॥ऋषयऊचुः॥ ॥ कस्यहेतोरिदंछिन्नंकालेनचदुरात्मना एतत्सविस्तरंब्रूहिकथांपापप्रनाशि
नीं १४ सूतउवाच शिवापुरेद्विजःकश्चित्सुतकर्मेतिविश्रुतः दुरात्माहिंसकश्चैवमातृगेमद्यपस्तथा १५ परद्रव्या
पहर्ताचपरस्त्रीषुरतस्तथा देवानांदूषकश्चैवकृतघ्नोब्रह्महातथा १६ एवंपापात्मकश्चैवनिवसेच्चशिवालये अहन्यहनि
दुष्टोसौपश्यतश्चशिवालयं १७ एकस्मिन्समयेविप्रपंचत्वंसमुपागतः ॥ शिवालयेनगर्दूयेशिवस्थानेविशेषतः १८ अथ

देवगणैःसर्वै नियतश्चस्फरालये । यमोपिस्वबलैर्युक्त आयातस्तत्र स्फरान्प्रति ।१९। यमउवाच । अयंदुरात्मकोदेवा महापाप
त्मकस्तथा । ममवध्यो दुराचारी नीयतेयमकिंकरैः ।२०। देवाऊचुः ॥ अयंशिवालयपुण्येपंचत्वंप्राप्तवानसौ । दुरात्मानोदिवं
यांतिशिवालयप्रसादतः ।२१। अथयुध्यन्यमोराजा किंकरैश्चबलान्वितः । देवताश्चततःसर्वे युध्यमानाःपरस्परं ।२२। ववर्षसा
यकैस्तीक्ष्णैर्मुसलैश्चपरश्वधैः । तदादेवैसमानीतः किलासंप्रतिसोद्विजः ।२३। सायुज्यतां ततो लेभे शिवालयप्रसादतः । य
मोपिस्वबलैर्युक्तोब्रह्माणंप्रतिचाग्रतः ।२४। यमउवाच । ब्रह्मन्शिवालयंनीतिः स्नातायेतेदिवंगताः । उद्वसाभिपुर्य
जाता ब्रह्मन्पातकिनोविना ।२५। पापंचैवोपपापंच महापापंचदुर्जनं । कुर्वाणास्ततरंते स्मस्नानमात्रेणजंतवः ।२६। इंद्रो
धीनंतुतत्सर्वंब्रह्मणागदितंस्तं ॥ आगतश्चततःसर्वे शक्रोप्यसभिवोत्यम ।२७। यमेनागत्यशीघ्रंवै जगद्वयेशिवालयं
शिवस्थानमिदंपुण्यंमापुकिल्बिषिणोदिवं । यस्यप्रसादतः सर्वइतींद्रायनिवेदितं । यमवृत्तांतमाकर्ण्यशक्रः प्राहयमंप्रति
शिवाज्ञामन्यथाकर्तुंकः शक्तःस्फरकोटिषु ।२८। गच्छातस्त्वंनिजंस्थानंमुक्त्वैवविरामह । तच्छ्रुत्वाचातिसंक्रुद्धोयमश्चा
रक्तलोचनः । दंडमुद्यम्यहस्तेनप्रययौसतदंतिके । समेत्यसयमःशीघ्रंजगद्वयेशिवालये । शिवास्थानमिदंपुण्यंमत्यकृत्याल्लो
मयाच्छिनत् । तदारभ्यमिदंतीर्थंबभौ खंडेंदुविवत ।३०। सूतउवाच । भग्नीकृतशिवस्थानेपलोनिःकिल्बिषोभवत । ऋ.मि
पुंजवपुर्यस्यपूर्वकर्मविपाकतः ।३१। ऋषयऊचुः ॥ एतस्यभुसमध्यं च अपचमानंसविस्तरं । कथ्यतांमुनिशार्दूल किंकृ
तंपूर्वजन्मनि ।३२। सोप्येतकेनपुण्येनकालेनकृतमुद्धरे । तदपिवंजगत्यर्थे विस्तारयशिवालयं ।३३। सूतउवाच ॥ श्रूयता
मिहमाख्यानंशिवभक्ताःसनातनाः । एतस्यापिचरित्रंवै शिवालयसमुद्भवं ।३४। आसीद्धर्मेश्वरोनाम श्रोत्रियोधनवान्
स्फखी । विद्याधरःस्फपुत्रश्चजातस्तस्यद्विजस्यच ।३५। गुरुणावर्तितंतस्यजन्मपत्रिसमुद्भवं । ततोधर्मेश्वरोविप्रोपंच

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारकम्

त्वंसमुपागतः ।३६। विद्याधरस्ततोविप्रोगृहस्थाश्रमपालयत् । एकस्मिन्समयेपश्यत्स्वकीयांजन्मपत्रिकां ।३७। त्रयश्चसहजोदोषा
मातृगोमद्यपस्तथा । ब्रह्महत्याभविष्यंति विद्याधरद्विजस्यच ।३८। ददर्शचततोविप्रः किंकरोमिविचार्यवान् । अहोधिकममकंजन्म
ममपातकसंभवं ।३९। गृहद्रव्यादिकंसर्वंदत्तोमातुःस्वयंययौ । अरण्येनिर्जनेघोरेपर्वतेद्रुमसंकुले ।४०। अथराज्ञाहृतंसर्वंमातृस्वंचधना
दिकं । तयाचत्याजितंगेहंदेशांतरमगच्छत ।४१। रेवातीरेमहास्थानेश्वानवदुणिकातदा । मांसाशिनीमद्यपाच जठरार्थेदुरात्मनि ।४२
भ्रमतश्चततोविप्रो आययौतत्पुरंप्रति । कामबाणैः पीडितोसौगणिकांतांददर्शच ।४३। ततोरात्र्यांप्रवृत्तायांसोगतः स्तद्गृहंप्रति
तयासहततःसंगोयथावच्चदुरात्मना ।४४। अस्फप्सश्चतयासार्धंतृषाक्रांतोभवन्निशि । उत्थितस्तत्क्षमानस्फनदृष्टितज्जलंतदा
४५ स्फरापात्रमथोलब्ध्वागृहीत्वातांपपौस्फरां । इदंमद्यमितिज्ञात्वासंस्मरेत्पूर्वकर्मजं ।४६। निद्राप्रच्चलितातस्याःपप्रच्छमिनंप्रति
किमर्थंगणिकाचाभूत्कथ्यतांतुसविस्तरं ।४७ पूर्वमाचरितंवृत्तंतत्सर्वंकथितंमया । दुःखितश्चततोजातोमुर्च्छितापतितोभुवि ।४८
तस्याःप्रचलितोविप्रोअन्नाहारविवर्जितः ।४९। एकस्मिन्नगरेयातश्चापश्यद्वारसंततः ।४९। गृहीत्वागोरसंतेनपात्रद्वयस्थितंचय
तः । यकृतः सविषंपात्रंसर्पेणवमितंतदा ।५०। एवंविप्रायतद्दत्तमेकमात्मनिभोजनं निमिषार्धेनविप्रोसौपंचत्वंसमुपागतः ।५१। पाप
त्रयमिदंजातंलिखितंपूर्वकर्मणा । इतिज्ञात्वाततस्तेनधिक्ममजन्मइतिब्रवन् ।५२। किंकरोमिक्वगच्छामिकागतिर्मेभविष्यति । शिवं
शिवमितिप्राहशिवनामप्रभावतः ।५३। शिवंचाराधयामासगृहीत्वाशांभवींकलां । रुद्राक्षधारणंकुर्वन्भस्मधारणमेवच ।५४।
शिवपंचाक्षरंमंत्रंजपन्संयतमानसः । शिवःकर्णेशिवोवाचिशिवोहृदिनियम्यच ।५५। नमःशिवायेतिसकृज्जपित्वापापंमहा
घोरमुपैतिनाशं । भूम्यंतरिक्षात्सरिपूर्णकाष्टंस्वल्पाग्निनादग्धमिमंतथैव ।५६। विभूतिर्वक्षसिगले अंगेरुद्राक्षधारणं मुखेपंचा
क्षरोमंत्रोजीवन्मुक्तोनसंशयः ।५७। ब्रह्महत्यादिभिः पापैर्मुच्यतेनात्रसंशयः । लिंगेस्कंदेसु विप्रोक्तं पुराणेकथितंमहत् ।५८।

विलोकितः २

४ शिवाराधनसंकुर्वन्पंचत्वंसमुपागतः विमानवरमारूढ आयातायमकिंकराः ५९ नियमाच्चास्यविप्रस्य आयाताशिवकिंकराः॥
परस्परैस्ततोयुद्धंसबलैश्चमहोद्यतैः ६० उभयैर्नियतस्वर्गसैरैश्चददृशेच भमनाविपुलंभालंशिवंशिवमितिब्रुवन् ६१॥ दे
वा ऊचुः॥ शिवदासमहाभागपापंपुण्यंत्वयाकृतं आदौतुकस्यकर्मस्य फलंभोक्षसिसुव्रत ६२॥ विप्रउवाच॥ इंद्राद्याः
सलिलादेवाः दयांकुरुमभोपरि एकेनतुशरीरेणकर्माणिद्वौभुनज्म्यहं ६३ ततोदेवगणैःसर्वैदत्तः सोमकुलोद्भवे संजातश्चततोराजा
एलनामाप्रतिष्ठितः ६४ रूपश्रीगुणवान्शूरोधनीचबहुबांधवो देवद्विजरतोनित्यंसर्वलोकानुपालकः ६५ एकदाराजशार्दूलोमृग
यालुब्धमानसः वनेस्मिन्दुर्गमेघोरेकालेनकृतमुद्वसे ६६ प्रहृष्टोसौनृपःपश्यन्संप्राप्तामृगयानदा उत्तरस्यांदिशिसंगच्छन्सददर्शकु
तूहल ६७ श्वापदानांचसर्वेषांनिर्वैरंदृष्ट्वानमिथः तपस्वीगौतमोविप्रोपालयामाससर्वदा ६८ पूर्वकर्मविपाकेनराज्ञासंप्रेषिता
तदा परस्परंमीलयित्वा आगतास्तेमुनिंप्रति ६९ ततस्तैःकथितंसर्वमेलस्याचरितंद्विज गतास्तेमृगशार्दूलाआश्रमान्मुनिपुंगवाः
गौतमस्कततःपश्यन्सर्वंतद्दृष्टसंवनं शापयामाससोविप्रएलराजानमुत्तमं ७१ दुरात्मन्स्कमहाबाहोकृमिपुंजोभविष्यसि तव
कर्मविपाकेनब्रह्मशापाभिशापतः ७२ ततश्चकृमिपुंजोसौस्वपुरेचागतोसति एवंदृष्ट्वातुतत्सल्यामानिकाइतिविश्रुता ७३ सातु
पतिव्रतासाध्वीसत्यवाक्यपरायणा गुणाढ्यारूपसंपन्नापतिशुश्रूषणेरता ७४ पप्रच्छसात्तदानतुःस्वामिन्कस्मिन्वनेगते
ऋषिणाकेनशाप्यस्त्वंकथ्यतांमेप्रियंकर ७७ एलउवाच दंडकारण्यदेशेतुमहेशाद्रौसुरालये गौतमेनतदाशापंहिंसकस्य
ददौमम पतिश्रुत्वातयंसाध्वी आगतातत्रनेखलु ७८ पश्यन्वचकृतासेवाषण्मासकृतनिश्चया प्रसन्नेनतदाप्राहगौतमेन
महात्मना ७९ कस्मात्वंसेवसेसाध्वेतत्त्वंवदस्वयथाविधि ८०॥ मानकावदुवाच॥ महर्षेसंप्रसन्नोसिमिनिःशापंकुरुगौतम तव
शापेनमेभर्तागतासौकृमिपुंजकः ८१॥ गौतमउवाच॥ अधुनाश्रुणुमद्वाक्यंमहिराज्यंकरिष्यति यथासौगतदेहेतरात्रौतु

४

कृमिपुंजकः ८२ इतिदत्वातदातेनवरंअनयकारणं एवंतुभुभयामासबहुवासरमेलस ८३॥ ॥इतिश्री[illegible]न्दपुराणेसह्याद्रिखं
डेशिवालयमहात्म्येशिवरात्रिमहात्म्येएलोपाख्यानेनामतृतीयोध्यायः॥ ३॥ ॥ऋषयऊचुः॥ शिवालयस्यमहिमाकर्णामृत
सः परःश्रूयमाणःपुनरपिशुश्रूषोनःसमर्थयेति १ सूतोवदविशेषेणतीर्थमहात्म्यमुत्तमं यंश्रुत्वासर्वपापानांसद्योभवतिनिश्चितं
सूतउवाच॥ आकर्णयंतुमुनयोमाहात्म्यंचशिवालयं श्रद्धानाःस्थिरधियोविचिकित्साविवर्जिताः ३ अथैकस्मिन्दिनेराजाप्र
विष्टोस्मिन्वनेशुभे मृगयासक्तमानस्कोक्रीडयामासनिश्चलः ४ सनृपस्त्रिदिनोराजाप्रापुःसरजलंतदा ईदृशंशिवकुलंछिन्नंका
लेनकृतमुद्वसं ५ सलिलंतदृतंसर्वंशीर्णपर्णैरमिश्रितं राज्ञादृष्टंतरापेनोः यदिकिंचिज्जलंस्थितं ६ शिवालयेतदादृष्टंसर्वपापह
रंशुभं तद्राज्ञापश्यतंतोयंनेत्रांतमुखचर्चितं ७ यदंगंचर्चितंतोयैस्तदभूत्कृमिवर्जितं तदद्भुततरंदृष्ट्वारात्रौसंगम्यकामिनी ८
भर्तारमेलनृपतिंविस्मयाविष्टमानसा पप्रच्छकामिदंनाथ ९ अद्यःसंक्रमितःकुत्रलुब्धातुमृगयावने कस्यप्रभा
वात्संजातंमास्यंकृमिविवर्जितं पाणिद्वयंतथैवापसर्वंविस्तरतोवद उवाचवचनंराजाश्रुत्वेच्छांगरहस्यवचः ११॥ एलउवाच॥ मृ
गयार्थंभयासर्वंवनंचोपवनंप्रिये भ्रमितंसह्यनिकटेलुब्धातुमृगयांततः १२ भ्रमनत्पादितस्तत्रदैवाद्धेनुपदेजलं दृष्टमस्यंप्रयत्ने
नगृहीतंतज्जलंमया तेनसंमार्जितंपाणियुगुलंमुखपंकजसा १ तदेवकारणंभद्रेनान्यज्जानामिसुंदरी १४ इत्थंनायवचःश्रुत्वा
परांमुदमवापसा प्रार्थयामासभर्तारं तद्धेनुपदपंकजं दर्शयित्वाशुजलं तन्मेसोमकुलोद्भव प्रियायास्त्वप्रियंवाक्यंश्रुत्वासाकंतयानृ
पः जगामसपुनस्तत्रगोपदंप्राप्यनृपति नापश्यदेतदाराजाकिंचिद्गोपदपंकजे १७ एलःशोकःकुलोजातःस्तत्रदैवान्महामुनिः
गौतमःप्रययौराजातस्मैसर्वंन्यवेदयत् १८ माशोकंकुरुराजेंद्रभूपतेःश्रुत्वाराजानंप्राहगौतमः माशोकंकुरुराजेंद्रब्रह्मार्पितामि
दंपयः १९ तदाकर्ण्यप्रियाप्राधंकथितंगौतमेनयत् प्रार्थयामासब्रह्माणं समुद्धरविशांपते ब्रह्मार्पितंतुतत्तत्तेनऋषिणागदितं

सर्वं॥२१॥आराधयामासविधिंप्रशस्तेनांतरात्मना।यथाविधकृतापूजानमस्कृत्यविचक्षणः॥२२॥ब्रह्मोवाच॥त्वमाद्यःसर्वभूतानांत्वंपि
तात्वंपितामहः॥त्वंधातात्वंविश्वसृट्त्वंचदेवेशस्त्वंप्रजापतिः॥२३॥जयेशत्वंस्फुरच्छ्रेष्ठब्रह्मात्वमभिधीयसे।लोकेशत्वंजगन्नाथविधातापरमःप्रभुः
॥२४॥जयादिजस्फुराध्यक्षयत्नेशचतुरानन।त्रिगुणस्थःस्वयंभूश्चकर्तात्वमभिधीयसे॥२५॥श्लोकत्रयमिदंपुण्यंत्रिकालंयःपठेन्नरः।संकटंनाशनं
तस्यभवत्येवनसंशयः।आगतश्चततोब्रह्माप्रोवाचतंवंस्शृणुएलः।सप्राहहर्षेणभामुधजगत्पते॥२६॥दीयतांतज्जलंमह्यंशिवा
धैर्येतुवदितंतूष्णींभूतोतदाब्रह्माकिंकरोमिविचार्यवान्॥२७॥गोपदस्थमिदंतोयंस्वल्पंतद्भूत्वकेवलं।इतिसंचिंत्यविधिनादातुंराज्ञेत
दाजलं।जगतामुपकारार्थंपुनरानीयतत्रवै।ब्रह्मणाप्रार्थितान्यष्टौतीर्थानिविविधानिच॥२९॥उत्तरांदिशिमारभ्यस्थापयामासयत्नतः
आदौवाराणसीतीर्थंगयातीर्थमतःपरं॥३०॥गंगाब्धिसंगमश्चैवविरजंतेचेतःपरं।विशालंशक्तिसंयुक्तंनासिकंत्र्यंबकंतथा॥३१॥द्वा
रावतीततोरेवाचाष्टौदिक्षुप्रतिष्ठिताः॥एवंचाष्टकतीर्थानिप्रार्थितानिशिवालये॥४०॥तदुच्यतेतदासर्वैरष्टौस्थानमिदंशुभं।षष्टिप
च्चांतरंजातंब्रह्मणानिर्मितंतदा।एतेषांतुपृथक्मेत्रात्स्नानानिचपृथक्पृथक्।हेमंगौर्यंतथाधान्यंवस्त्रंचरत्नमेवच॥४२॥हयंद
मिप्रदत्वंचगोशतंचततःपरं।एवमष्टासुतीर्थाणियेकुर्वंतिनरोत्तमाः।स्नानदानक्रियायुक्तास्तेषांशृणुफलंसखे।गंगाप्रवाहस्नानस्य
वाग्मीभूत्वंविजृंभते॥४४॥बृहस्पतिसमोयुध्यापुरंदरसमश्रिया।तेजसादित्यसंकाशोभार्गवेनसमोनये॥४५॥धनदेनसमोथ
नत्स्यावित्तपरिग्रहे।प्रतापेवन्हिसाकाशोप्रकाशेशशिनासमः॥४६॥बलेनमरुतातुल्योमयाचब्रह्मवर्चसा॥जरामरणनि
र्मुक्तोवेदशास्त्रार्थकोविदः।एवंचिरायुर्निर्वाणेदेवस्यानुचरोभवेत्।सर्वसिद्धिमवाप्नोतिपुनस्त्यासप्तमंकुलं॥४८॥सर्वत
त्वार्थविज्ञानमयाचसमतांव्रजेत्।बहुवात्रकिमुक्तेनयेकुर्वंत्यवगाहनं॥४९॥तेसिध्याःसिध्दिदाल्लोकेप्रांतेसायुज्यमाप्नुयात्॥
सूतोवाच॥तत्सत्यासहितोराजाआयातस्तुशिवालये।विधिवच्चततःसांगंस्नानंदानंतदाकृतं॥५०॥पौरोहित्यःकृतापं

चशिवापुरनिवासिनः॥कौशिकोत्रिर्वसिष्ठश्चकाश्यपःशौनकस्तथा॥५१॥तर्पणंपिंडदानंचब्रह्मयज्ञजपादिकं।होमंदानंचविप्राणांदेवानामं
र्चनंतत॥५२॥पश्यतांमेवदेहेतुजातेनिःकिल्मिषेतदा।ददर्शतंमहादेवंघृष्णेशंमहाद्भुतं॥५३॥तत्सोडशोपचारैस्तुसमभ्यर्च्यविशांपतिः॥
नमस्कृत्ययथोक्तेनपत्न्यासहनृपेश्वरः॥५४॥माणिकादेव्युवाच॥हेभर्तस्त्वंममस्वामिन्ममवांछानराधिप।भूतंचवर्तमानंचभविष्यंचमया
कृतं॥५५॥देवतानांसमस्तानांमानवानांविशेषतः॥अष्टादशपुराणानांयेचान्येतत्समुद्भवाः॥५६॥यदासर्वमिदंदृष्ट्वाभोजनंयेभविष्यति इति
निश्चयमेकृत्वादर्शयस्वमहीपते॥५७॥तदाराज्ञासमानीतोकौकसोविश्वकर्मजः॥स्नानदानरतोनित्यंदेवतातिथिपूजकः॥५८॥राजोवाच॥क
लायुक्तंसंदर्शयविचित्रकं।स्वल्पेपटेलिखितंसर्वंदृश्यताभवयोःसखे॥५९॥अथतेनकृतंसर्वंयदुक्तंएलजायया॥नानाचित्रैश्चसंयुक्तैर्भुवना
निचतुर्दश॥६०॥दर्शमाणकादेव्यायत्कृतंतुतदद्भुतं।ननर्तप्रजहर्षायशिवगाथाभगायत॥६१॥ततस्तेब्राह्मणासर्वाभोजनंचाददौनृपः॥
स्वयंभुक्तस्तयायुक्तःप्रहृष्टेनांतरात्मना॥६२॥अथैलःसोमहाराजास्वकीयंराज्यमुत्तमं।पुपोषपालयामासशिवभक्तोदृढव्रतः॥६३॥
ऋषयऊचुः॥अधुनाश्रोतुमिच्छामितीर्थंचामृतसंज्ञिकं।सह्याद्रेश्चोत्तरेभागस्वल्पतोयंमहत्फलं॥[illegible]तोवाच॥पार्वत्यासहदेवेशः
सह्याद्रिशिखरेखलु।चिक्रीडस्मिन्वनेपुण्येप्रहर्षेनांतरात्मना॥६५॥गौरीप्राहशिवेशंभोतृषयापीडितासुवा किंकरोमिजलंकस्मि
प्राप्यतेस्मिन्वनेनच॥६६॥प्रार्थयामासगौरीशंकाकारंचाद्रमेश्वरं।जयदेवमहादेववदेहिमेशीतलंजलं॥६७॥दुर्लभंयत्सुरेंद्राणांम
नुष्याणांचकाकथा।तदागौरीश्वरःशंभुःत्रिशूलेनाहनद्भुवि॥६८॥सह्याद्रेश्चोत्तरेभागआगतममृतंपरं।ददर्शपार्वतीदेवीतत्ता
दद्भुतात्मकं॥६९॥शिवयासहितःशंभुःपपौतदमृतंमहत्।दृष्ट्वातत्कृतदात्मानंदिव्यकायात्मकंप्रियं॥७०॥तदादेवेनमहातातदितंती
र्थमुत्तमं।तंभूपेशनतदाप्राहभवानीतांप्रियांप्रति॥७१॥ममभक्तानराःकेचिच्छुचिभक्ताजितेंद्रियाः।प्राप्यतेमज्जलंचेदंस्वल्पंतदपिदु
र्लभं॥७२॥तैश्चकृतंसोमपानंसप्तपानंतथैवच।सर्वतीर्थेषुतेस्नाताःयेप्राप्तममृतंसिदं॥७३॥पंचरत्नंयथाशक्त्यादानंश्रीफलमेवच

सर्वान्कामानवाप्नोतिशिवसायुज्यमाप्नुयात।७४।ऋषयऊचुः॥ अनेकानिचतीर्थानित्वयाप्रोक्तमहामते सूर्येंदुसंज्ञिकेतीर्थेभूयोवदसवि
स्तरं।७५।सूतउवाच॥ ब्रह्माद्याःसकलादेवाःदर्शनार्थंशिवस्यच आगतास्मिन्नेपुण्येशिवालयसमांतिके ७७ तदासूर्यश्चसो
मश्चतस्तुदक्षिणादिशि पर्वताग्रेसुपुण्येचमार्कंडेयसमांतिके ७८ तदातीर्थंचसंजातंसूर्येंदुस्तकसंज्ञिके सांप्रतंभास्करस्तूर्णमुपः
कालेवगाहति ७९ तत्रस्नानंप्रकुर्वीतउषःकालेरवौदिने सर्वान्कामानवाप्नोतिपुत्रसौभाग्यमाप्नुयात ८० हेमदानंप्रदद्याच्चकार्प
सांगांतथैवच तर्पणंपिंडदानंचब्रह्मयज्ञंजपादिकं ८१ मार्कंडेयस्तदापूज्योरविः सोमस्तथैवच रौप्यदानंप्रकुर्वीतसोमकुंडेयथा
विधि ८२ अश्विनेपौषमासेवारेधिसंक्रमणेतथा सूर्येंदुग्रहणेप्राप्तेसर्वान्कामानवाप्नुयात।८३॥ ।इतिश्रीपद्मपुराणेसह्याद्रिखंडे
शिवालयमहात्म्येएलोक्षाग्रेनामचतुर्थोध्यायः॥ ॥ ॥ऋषयऊचुः॥ एतेषांचपृथक्मंत्राःदानानिचफलानिच॥१॥ कथ्य
तांसकलजलंचदानंकिमितिसंख्यया॥ तत्सर्वंश्रोतुमिच्छामिविस्तरेणैव॥ कथंतदेवतीर्थाणिकथितानित्वयापुना॥ थातथ्यं २
सूतउवाच॥ शृणुध्वंऋषयःसर्वेयद्दृष्टंतिचशाश्वतं सर्वकामप्रदंनृणांपुत्रसौभाग्यदंपरं॥३ तत्रतावद्दुदीच्यांतुवाराणस्यांय
थाविधि॥ शिवकुंडंजगद्वंद्यंउत्तरायांसमाश्रितः।४ यज्ञोपवीतंप्रक्षाल्यप्रक्षाल्यचरणद्वयं। शिखाग्रंथिंचदत्वाचकारयेदाचमनं
ततः।५ प्रदत्वहस्तयोर्दर्भान्प्राणायाममाचरेत् तिथिंश्रवणमाकर्ण्यइमंमंत्रंजपेद्बुधः ६ कामधेनुपदोद्भूतंऐलकि
ल्बिषनाशनं ब्रह्मणाप्रार्थितंतीर्थंगृहाणार्घ्यंनमोस्तुते ७ जन्मनायत्कृतंपापंयत्पापंपूर्वजन्मनि तत्सर्वंविलयंयांतिशिवालय
निजस्नानात् ८ विश्वामित्रंनमस्तुभ्यंनमस्तुभ्यंशिवालयं ऋषीन्मुनीन्नमस्कृत्यगृहाणार्घ्यंनमोस्तुते ९ गयागंगाकुरुक्षेत्रं
काशीनैमिषकाननं वेणीचयमुनारेवाक्षिप्राचैवसरस्वती १० कृष्णातापीपयोष्णीचगोदातुंगाचभद्रिका विशालाविरजं
सेतुंसौराष्ट्रंचकुशस्थली ११ तीर्थंतुदृश्यतेकिंचित्पातालेमर्त्येवादिवि॥ एषामेकोत्तमंविश्रियवाधिक्यंशिवालयं दर्शनात्स्पर्शना

त्स्नानाद्वंबुपानादभिषेचनात् दुष्टात्मानोदिवंयांतिनमंतिभुविपापिनः ब्रह्मविद्रोहिणःकृतघ्नायेसदाविश्वासघातकाः सुरापान
ब्रह्महंतारोगुरुभ्रागुरुतल्पगाः तेपिब्रह्मानाःदिवंप्राप्ताः शिवालयनिषेवणात् १४ विनायज्ञैर्विनादानैस्तपोभिर्वाविनाब्रतैः॥
विनावेदैर्विनादानैस्तीर्थैरन्यैर्विनानराः॥१५॥ शिवालयप्रसादेनतरंतिसर्वेभयार्णवं इतिमंत्रानामुच्चार्यस्नानंकुर्याद्यथाविधि॥ १६ वारा
णस्यांभैरवोदेवोसंसारभयनाशनः अनेकजन्मकृतंपापंस्मरणेनविनश्यति १७ विश्वेश्वरंनमस्कृत्यअन्नपूर्णांतुभैरवं वाराणस्यांज
गन्नाथगृहाणार्घ्यंनमोस्तुते १८ एवमर्घ्यंप्रदत्वातुस्नात्वाविश्वेश्वरंनमेत् निष्कपादंशहेमंतुप्रदद्याद्गुरवेतदा १९ एवंयःकुरु
तेमर्त्यःश्रद्धाभक्तिसमन्वितः सतारयेद्दशैवंश्यान्पुरुषानेकविंशति॥ २०॥ शिवकुंडदिग्याम्येगयातीर्थविशेषतः यथाव
त्क्रियतेस्नानंइमंमंत्रंजपेद्बुधः २१ गयायांपितृरूपेणस्वयमेवजनार्दनः तंदृष्ट्वापुंडरीकाक्षंमुच्यतेचऋणत्रयात् २२ पंचक्रोशं
गयाक्षेत्रंक्रोशमेकंगयाशिरः यत्रयत्रमनुष्याणांपितृणांदत्तमक्षयं २३ इतिमंत्रानमुच्चार्यस्नानंकुर्याद्यथाविधि रौप्यरा
नमयंप्रोक्तंपदुकंविष्णुनास्वयं २४ तर्पणंपिंडदानंचब्रह्मयज्ञजपादिकं यथावत्क्रियतेभक्त्यादृष्ट्वादेवंगदाधरं २५ कामधेनोः
पदंविष्णोःपूजयेद्भक्तिसंयुतः सब्रह्मगोघ्नस्त्रीणांहत्यायामुच्यतेध्रुवं २६ पूर्वादिग्नागजंतीर्थंगंगासागरसंगमं सर्वतीर्थमयं
लोकेइमंमंत्रंजपेद्बुधः २७ त्र्यंबकेअब्जकेचैवगंगासागरसंगमे सर्वत्रसुलभागोदात्रिषुस्थानेषुदुर्लभा २८ त्र्यंबकस्यजटोद्भूतगौ
तमस्यापनाशिनी सप्तधासागरंयाति श्रीगोदावरीनमोस्तुते २९ सागरत्वंमहातीर्थंसर्वदेवात्मकस्तथा मयाकृतानिपापानि
विलयंयातुसर्वदा ३० इतिमंत्रानमुच्चार्यस्नानंकुर्याद्यथाविधि द्रोणप्रमाणधान्यंचप्रदद्याद्गुरवेतथा ३१ सर्वलिंगात्मकंचैव
विलोक्यसंगमेश्वरं अन्नंचबहुलंतस्यभवसेवनसंशयः ३२ शिवालयाग्निदिग्भागेविरजंतीर्थमुत्तमं तत्रावगाहनंचैवइमं
मंत्रंजपेद्बुधः ३३ लवणासुरस्यचातीयेविष्णुचरणसमुद्भवं सर्वकामप्रदंनृणांगृहाणार्घ्यंनमोस्तुते ३४ मेरुमंदारतुल्यानि

७ पापानिखलुतानिवैतसर्वंविलयंयांतिविरजस्यविलोकनात् ॥३५॥ इतिमंत्रान्समुच्चार्यस्नानंकुर्याद्यथाविधि ॥ सालंकाराणिसर्वा
णिवासांसिप्रदद्देततः ॥३६॥ कमलंशालिकमालोक्यपूजांकृत्वाद्ययाविधिः ॥ नमस्कृत्वाप्रयत्नेनसर्वरोगैःप्रमुच्यते ॥३७॥ विशाल
मितिचाख्यातंतीर्थयाम्यंमहोत्तमं विधिवत्तत्रस्नातस्त्विमंमंत्रंजपेद्बुधः ॥३८॥ नमस्तेस्तुमहामायेनमस्तेशिवपूजिते ॥ शंखच
क्रगदाहस्तेमहालक्ष्मीनमोस्तुते ॥ औदुंबरतरोमूलेजान्हवीतत्रसंस्थिता ॥ सोमेनप्रार्थितागंगागृहाणार्घ्यंनमोस्तुते ॥ इतिमंत्रान्स
मुच्चार्यस्नायात्तत्राचलक्ष्मी ॥ हयदानंयथाशक्त्याप्रदद्याद्गुरवेतदा ॥४०॥ भवानींपूजयेत्सम्यग्वस्त्रालंकारभूषणैः ॥ एवंयःकुरुतेन
त्त्याचक्रवर्तीपदंलभेत् ॥४१॥ शिवालयस्यनैरृत्येनासिकंत्र्यंबकंतथा ॥ तीर्थानांप्रवरंचेदंयद्युक्तंगौतमेनच ॥४२॥ विधिवत्क्रियतेस्ना
नमिमंमंत्रंजपेत्सुमान् ॥ गोमद्वारेकुशावर्तेबिल्वकेनीलपर्वते ॥ स्नात्वाकनकलेतीर्थेपुनर्जन्मनविद्यते ॥४३॥ अरुणावरुणयोर्मध्ये
यत्रप्राचीसरस्वती ॥ तत्रस्नात्वानरोभक्त्याब्रह्महत्यांव्यपोहति ॥४४॥ हदानंप्रदद्याच्चसकलंकुरुतेद्रुतं ॥ त्र्यंबकेचमहादेवंसंपूज्य
परमेश्वरं ॥ एवंयःकुरुतेभक्त्यापुत्रसौभाग्यमाप्नुयात् ॥४५॥ द्वारकागोमतीतीर्थंप्रत्यग्गाशांसमाश्रितं ॥ स्नातव्योविधिवत्तत्रइमंमं
त्रंजपेद्बुधः ॥४६॥ गोमतीगोमयस्नानंगोदानंगोपिचंदनं ॥ दर्शनंगोपिनाथस्यगकाराःपंचदुर्लभाः ॥ अस्नानेनमुच्यतेप्रया
गमरणेनवा ॥ अथवास्नानमात्रेणगोमत्यांकृष्णसन्निधौ ॥ इतिमंत्रान्समुच्चार्यस्नानंकुर्याद्यथाविधि ॥ ततस्तेभ्योधिकंचास्मिन्
भूमिदानंप्रशस्यते ॥ गोमत्यांसहितंदेवंगोपिनाथंविलोक्यच ॥ ससर्वांभूमिमाप्नोतिदीर्घायुर्लोकपूजितः ॥५०॥ रेवाविनायकोपितंवा
यव्यांदिशिसंस्थितं ॥ पूर्णेनदृश्यतीर्थेचजपेन्मंत्रमिमंतदा ॥५१॥ ॐकारेचकुरुक्षेत्रेनर्मदार्णवसंगमे ॥ सर्वत्रसुलभारेवात्रिषु ७
स्थानेषुदुर्लभा ॥५२॥ रेवातीरेतपःकुर्यान्मरणंजान्हवीतटे ॥ दानंदद्यात्कुरुक्षेत्रेत्र्यंबकेगौतमीतटे ॥५३॥ लंबोदरनमस्तुभ्यंसतत
तंमोदकप्रिय ॥ अविघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ इतिमंत्रान्समुच्चार्यप्रदद्याद्गोघृतंतस्य ॥ यथावत्क्रियतेस्नानंतर्पणंचज

पादिकं ॥ हवनंचाष्टमंत्रैश्चवेदोक्तैर्विविधैस्तथा ॥ वाजपेयफलंलेभेसर्वसिद्धिमवाप्नुयात् ॥५५॥ अष्टतीर्थमिमंदिव्यंश्रद्धया
यःकरोतिच ॥ तेनतुष्टोष्टमूर्तिस्तुकैलासेप्रयोतथाकरो ॥५६॥ ससर्वांभूमिमाप्नोतिशिवसायुज्यमाप्नुयात् ॥ ऋषयऊचुः ॥ प्रदक्षिणामिमांब्रू
हिमहेशाद्रिसमुद्भवाम् ॥५७॥ कस्मादारंभयेत्पूर्वंचांतेकापूज्यदेवता ॥५७॥ किंपुण्यंकिंफलंसूतप्रदक्षिणासमुद्भवं ॥ तत्सर्वंश्रोतुमिच्छामो
पुण्यंश्रवणकीर्तनं ॥५८॥ सूतउवाच ॥ आदौतुभैरवोदेवःपूजनीयःप्रयत्नतः ॥ शिवालयेनथास्नानंकुर्याच्चविधिपूर्वकं ॥५९॥ संपूज्य
चसगणेशंचएकवीरांददर्शच ॥ संपूज्योहनुमान्शूरोगरवलांनागनिर्झाणि ॥६०॥ तत्रावगाहनंमोक्षंनागेशंलस्तनायकं ॥ चिंतामणिंचलक्ष्मी
शंत्रैलोक्यस्वामिनंतदा ॥६१॥ प्रयागेणसमंप्रोक्तंत्रिकंटकमिदंशुभं ॥ तत्रावगाहयेद्धीमान्स्वर्णजालेश्वरंतथा ॥६२॥ नमस्कृत्वापुरोग
च्छेदुत्तरांदिशियत्नतः ॥ कामधेनुस्तदापूज्यावैतरणीतिविश्रुता ॥६३॥ अस्लेशंचनमस्कृत्वायोगौर्यापूजितोसनैः ॥ गंधर्वैसहस्रस्नानातीर्थे
गांधर्वमुच्यते ॥६४॥ तत्रावगाहयेद्धीमानग्रगच्छेन्निर्जनेवने ॥ वाराहेनकृतंतीर्थंपूजयाभासतंशिवं ॥६५॥ वाराहवापिकांस्नात्वापश्येद्यो
देवपंचकं ॥ तेनदृष्टःपंचवक्त्रःसर्वपापैःप्रमुच्यते ॥६६॥ गोमुखंचततस्तीर्थंएलसंशयहारकं ॥ जान्हव्यारूपसंदर्शेप्रपापघ्नंसर्वकामदं ॥६७॥
तत्रस्नानंप्रकुर्वीतसंपश्येन्महिषीहरः ॥ ततोगच्छेन्महेशाद्रिशिखरंसर्वकामदं ॥६८॥ यस्मादेलानदीपुण्यासमुद्भूतात्रपावनी ॥ समेत्यगिरिजा
यत्रतपःकृत्वासुदुस्तरं ॥ पंचास्यंजगतामीशंपुनर्लेभेमहेश्वरं ॥ औदुंबरंयत्रचाविभातितीर्थंउमावनंतरऋषिभिःप्रगीतं ॥ फलैर्नानारसपा
णाःसमंतात्सिमुरूसंख्यानुदिनंस्रुएष्वैः ॥७१॥ तत्रगत्वाप्रयत्नेनस्नायादौदुंबरेसुधीः ॥ गिरिजांपूज्यविधिवद्दानंदद्याच्चशक्तितः ॥७२॥ ता
त्रेश्वरंचइंद्रेशंइंद्रालयसमांतिकं ॥ योगेश्वरींचसंपूज्यस्नात्वाकुंडस्थभैरवं ॥७३॥ भद्रकालीभद्रतीर्थंसर्वपापहरंखलु ॥ कांतार्थीनाप्रकर्त
व्यंस्नानंतत्रप्रयत्नतः ॥ दानंचविधिवद्दंपसपत्नीकोभवेन्नरः ॥ स्नानमेवंप्रकुर्वीतप्रगच्छेद्रामतीर्थकं ॥७४॥ रामेश्वरंततःपश्येत्प्रगच्छे
त्स्नत्स्रणेश्वरं ॥ पूर्णलिंगमितिप्रोक्तंज्योतिर्लिंगमनुत्तमं ॥७५॥ एषाप्रदक्षिणाप्रोक्तापार्वतीप्रतिशंभुना ॥ मेरुप्रदक्षिणतुल्यासर्वपापा

पद्मारकं ७६ ये कुर्वंति नरा केचिच्छुचिष्मंतो जितेंद्रियाः ॥ पदे पदे क्रतुफलं लभंत्येव न संशयः ॥७७॥ इति श्रीपद्मपुराणे सह्याद्रिखंडे शिवालयम
हात्म्ये तीर्थयात्रा महेशादिप्रदक्षिणानिरूपणं नाम पंचमोऽध्यायः ॥५॥ ॥ ॥ ऋषय ऊचुः ॥ सूतं सन महाप्राज्ञ सर्वशास्त्रविशारद
शिवाख्यानस्य पापानि वर्यंत स्नान कांहिचित ॥१॥ पूर्णालिंगालयाख्यं च नाम्ना तु घृष्णेश्वरं ॥ ज्योतिर्लिंगमनोस्माकं तस्याख्यातं वदाधुना ॥२॥
किमर्थं भगवान् शंभुर्घृष्णेशाख्यमगाद्भुवि ॥ तीर्थं शिवालयं नाम किमर्थं विधिना कृतं ॥३॥ सूत उवाच ॥ अतः परं च घृष्णेशं ज्योतिर्लिंगमुदाहृ
तं तस्यैव च माहात्म्यं शृणुतां ऋषिसत्तमाः ॥४॥ यदा तु संसमभवद्दिव्यमयभयास्करः ॥ तस्यैव निकटे कश्चिद्ब्राह्मणो द्विजपुंगवः कृत्वा
पर्णकुटीं तत्र चकार वसतिं तदा ॥ भारद्वाजकुलोत्पन्नः सत्यव्रतपरायणः ॥५॥ सुधर्मा नाम विप्रश्च सर्ववेदाब्रह्मसत्तमः ॥ तस्य प्रिया सुदे
हा च साध्वी धर्मपरायणा ॥७॥ सुधर्मा च द्विजश्रेष्ठो देवातिथिसुपूजकः ॥ वेदमार्गपरो नित्यं अग्निसेवापरायणः ॥८॥ त्रिकालं संध्यया युक्तः
सूर्यरूपसमद्युतिः ॥ शिष्याणां पाठकश्चैव वेदशास्त्रविचक्षणः ॥९॥ धनवांश्च परो दाता सौजन्यगुणभाजनः ॥ आसुर्बहुन्यनीतं च तस्य
धर्मं प्रकुर्वतः ॥१०॥ पुत्रश्च नाभवत्तस्य ऋतुः स्यात्फलः स्त्रियः ॥ तेन दुःखं कृतं नैव तत्त्वज्ञानपरायणः ॥११॥ आत्मनो तारकश्चात्मा ह्या
त्मानो पातकश्च सः ॥ इत्येवं मनसि धृत्वा दुःखं न कृतवान् तदा ॥१२॥ सुदेहापि सदा दुःखं चकार पुत्रसंभवं ॥ नित्यं च स्वामिनं सा च प्रार्थयत्य
त्नतां कुरु ॥१३॥ सोऽपि स्त्रियं तु निर्भर्त्स्य किं पुत्रश्च करिष्यति ॥ का माता कः पिता पुत्रः को वा बंधुः प्रियंकरः ॥१४॥ सर्वे स्वार्थपरे देवि जानीहि
त्वं न संशयः ॥ तस्मादेतत्त्वया दुःखं त्यजनीयं सुनिश्चितं ॥१५॥ नित्यं मधुं तया नैव कथ्यते यं प्रनत्रते ॥ एवं तां संनिवार्यैव भगवद्धर्मतत्प
रः ॥१६॥ आसीत्परमसंतुष्टः द्वंद्वदुःखं समत्यगात् ॥ कदाचित्स सुदेहा वै गृहे च सहवासिनः ॥१७॥ जगाम प्रियगो अर्थे विवादः तत्र संग
तः स्वपत्याः स्त्रीस्वभावाच्च भर्त्सिता सा तया तदा ॥१८॥ अपुत्रिणी कथं वै च करोषि पुत्रिणीं हठं ॥ मद्धनं भो क्षते पुत्रस्ते धनं कश्च नाक्ष
ति ॥१९॥ राजा हरिष्यति नूनं धिक्त्वमानं ते च वै धिके ॥ तया च भर्त्सिता सा वै गृहमागत्य दुःखिता ॥२०॥ स्वामिनं कथयामास तदुक्तं सर्व

मादरात् ॥ ब्राह्मणोऽपि तदा दुःखं न चकार सुबुद्धिमान् ॥१८॥ कथितं कथ्यते तेन वयद्भाविनद्भवे प्रिये ॥ इत्येवं च तदा तेन ह्याश्वस्तापि
पुनः पुनः ॥१९॥ न तत्याज तदा दुःखं ह्याग्रहं कृतवत्यसौ ॥ यथा तथा त्वया पुत्रः समुत्पाद्यः प्रियोऽसि मे ॥२०॥ अन्यथा चेत्त्यजिष्यामि देहं
देहभृतांवर ॥ एवमुक्तं तदा श्रुत्वा ब्राह्मणश्चिंतयायुतः ॥२१॥ अग्ने स्नेन दाक्षिभं पुष्पद्वयमतंद्रितः ॥ मनसि दक्षिणं पुष्पं धृतं पुत्रफलप्रदं
॥२२॥ एवं कृत्वा स पत्नीं च उवाच ब्राह्मणस्तदा ॥ अनयोरेकतमं ग्राह्यं त्वया पुष्पं फलाप्तये ॥२३॥ तया च मनसि धृत्वा पुत्रश्चैव भवेन्म
म ॥ तदा च स्वामिना पुष्पं धृतं यैत्तत्तसेमेष्यतु ॥२४॥ इत्युक्त्वा च तया तत्र नमस्कृत्य सर्वं तदा ॥ नत्वा चाग्निं ततः प्रार्थ्य गृहीतं पुष्पमेक
तः ॥२५॥ पुरुषेण चिंतितं यच्च तद्गृहीतं तया नहि ॥ तद्दृष्ट्वा पुरुषश्चैव विश्वासं परमं मोचयत् ॥२६॥ निर्मितं चेश्वरेणैव कथं चेतान्यथा भवे
त् ॥ अशांत्यजप्रियत्वं च परिचर्यां हरेः कुरु ॥२७॥ इत्युक्त्वा तु स्वयं विप्रः आशां परिविहाय च ॥ धर्मकार्यरतः सोऽभूद्भगवद्ध्यानतत्परः ॥
इयं चैवाग्रहं नैव मुमोच पुत्रकाम्यया ॥२८॥ मयि पुत्रो न वा स्येवयेनां कुरु ममाज्ञया ॥ तस्यां भविष्यति नूनं पुत्रश्चैव न संशयः ॥२९॥ तयै
वं प्रार्थितः सोऽवै चवाच सप्रियां तदा ॥ त्वदीयं च मदीयं च तत्सुदुःखं गतं ध्रुवं ॥३०॥ तस्मात्त्वं धर्मवित्तं च मा कुरु सांप्रतं प्रिये ॥ इत्येवं वा
रिता सा च स्वभ्रातुः पुत्रिकां तदा ॥३१॥ कन्यां चानीय भर्तारं कृष्णुहो न प्रियोऽसि मे ॥ इदानीं वदसि त्वं भोन ह्रियसे ततः पुनः ॥३२॥ तत्प्रि
यं करोष्यस्य करिष्ये प्राणमोक्षणं ॥ प्रियायाश्च वचः श्रुत्वा सुधर्मा तां जगाद ह ॥३३॥ पुत्रस्तु यदा स्याद्वै तेदास्य पांकरिष्यसि ॥ इत्यु
क्ता सा वचस्तत्र भगिनी ज्येष्ठता मम ॥३४॥ पुत्रमाना मसाविप्रर्यस्याः स्वस्याः दास्या क्षिप्रं पुनः करिष्यामि न संदेहः त्वया का र्य
र्यः सुनिश्चितं ॥३५॥ इत्येवं प्रार्थितः सोऽपि चचाल गृहिणीप्रिया ॥ परिणाम्य तन्मत्तां तु त्वदीयामिति सां पुनः ॥ प्रार्थयामास धर्मात्मा
इत्थं पोष्यालयानघे ॥३६॥ उक्त्वैवं स च कारास्कधर्मसंग्रहमात्मनः ॥ सा चापि भ्रातृपुत्रीं च या स्वैव परेचर्यत ॥३७॥ कनिष्ठा चैव या
पत्नी सुकृतुज्ञामवाप्य च प्रार्थिता न साच का शु नित्यमेकोत्तरं शतं ॥३८॥ विधानपूर्वकं यच्च ह्युपचारसमन्वितं ॥३९॥ कृत्वा सा प्राशिपत्तत्र ग

तांयांसरसस्तदा। यमदंडप्रहारेणगतंयस्माज्जलंपुरा।४०। विसर्जंपुनर्गत्वाद्यपूजांकृत्वाविधानतः। एवंजातेतदाकालेलिंगलक्षमभूत्तदा।४१।
कृपयाचशिवस्यैवपुत्रस्तस्यामजायत सुंदरसुभगश्चैवकल्याणगुणभाजनः।४२। तंदृष्ट्वापरमप्रीता ब्राह्मणीधर्मसत्तमः। अनासक्तःसु
खंभेजेज्ञानधर्मपरायणः।४३। सुदेहातावदस्यांतुस्पर्धांनैवचकारसा। प्रथमंशीतलंतस्याः हृदयंह्यभवत्पुनः।४४। तदनंतरंचयज्जातंश्रूय
तांऋषिसत्तमाः। पुत्रंदृष्ट्वाकनिष्ठायाःज्येष्ठादुःखमवापसा।४५। सूतउवाच॥ सर्वेपुत्रप्रसक्तस्तत्रप्रासंत्यननिरंतरं। नसह्यतेस्मतयातच्च
रूपंचैववधिर्षारस्य।४६। सा प्रियेतनयंदृष्ट्वाहृदयेचाग्निसंयुतं। एतस्मिन्नंतरेविप्राःकन्यांदातुसमागताः।४७। विवाहंतस्यतत्रैवचकारविधि
वन्मुदा। विप्रोघुसृणयासार्धंआनंदंपरमंगतः।४८। सर्वेसंबंधिनस्तस्यांघुसृणायांमनोरथः। तदृष्ट्वासासुदेहाचमनसिज्वलितातदा।४९।
गृहमागत्यसधर्माचवधूंपुत्रंमुनीश्वराः उत्संगंदर्शयामासप्रियाभ्यांदर्शयन्निव।५०। मनसिहर्षितात्यंतंघुसृणाप्रियभाषिणी। तंदृष्ट्वादुःस
हंकर्मसुदेहादुःखमागता।५१। गृहेचलंतवालोक्यवधूपुत्रंसुदेहिका। अत्यंतंदुःखमापन्नाहाहतास्मितदापतत्।५२। घुसृणानांसुदेहांतुउ
वाचमधुरंवचः। किमर्थंदुःखितामातस्त्वदीयानमदीयका।५३। पुत्रश्चैववधूश्चैवश्वश्रूर्ज्येष्ठामन्यत। अत्रापियत्रज्येष्ठांचमेननवक
निष्ठिकां।५४। तथापिचलदाज्येष्ठात्यंतमल्पवतीह्यभूत्। तदाविचारयामासदुःखशांतिकथंभवेत्।५५। मद्र्योहृदयाग्निश्चघुसृणानेत्रवारि
णा। शांतोभविष्यतिन्यूनंनान्यथापशांतिमाप्नुयात्।५६। तनयंमारयाम्यद्यसप्रियंप्रियवादिनं। अग्रेभावि भवेदेवनिश्चयंपरमंगता।५७।
कर्तव्याणांविचारश्चकृत्वाकृत्येनचेन्नहि। एकस्मिन्दिवसेज्येष्ठाशयानंपुत्रंवधूयुतं।५८। छेदयामासचांगेषुगृहीत्वाछुरिकांचसा। सर्वांगखं
डान्यादायरात्रौसरस्यप्राक्षिपत्।५९। यत्रक्षिप्तानिलिंगानिनित्यंघुसृणयाद्विजाः। तत्रक्षिप्त्वासमायातासुष्वापसुखतांगता।६०। प्रातश्चै
वसमुत्थायघुसृणानित्यंतदाकरोत्। सधर्माचस्वयंश्रेष्ठानित्यकर्मसमाचरत्।६१। स्नानादिकंतदाताच्चकृत्वानित्यंप्रचक्रमुः
एतस्मिन्नंतरेसाचज्येष्ठाकर्मगृहस्यच।६२। चकारानंदयुक्ताचह्यग्निशांतिर्भविष्यति। प्रातःकालेवधूत्थायवधूशय्यांविलोक्यच
रुधिरार्द्रांदेहखंडैर्युक्तांदुःखमुपागता। श्वश्रूंनिवेदयामासपुत्रस्तेचकुतोगतः।६४। शय्याचरुधिराद्रावैदृश्यतेदेहखंडकैः। हा

हतास्मिकृतंकेनदुष्टंकर्मसुचित्रतं।६५। ज्येष्ठादुःखंतदापन्नाहाहतास्मिकिलेतिच॥ दुःखंचकारसातत्रमनसिहर्षसंयुता।६६। घुसृ
णापितदातस्याःवधूदुःखंनिशम्यच। नचचालव्रतात्तस्मान्नित्यपार्थिवपूजनात्।६७। मनश्चैवोत्सुकंनैवजातंतस्यामुनीश्वराः। भर्ता
पिचतथैवासीद्यावत्सचविधिर्भवेत्।६८। मध्याह्नेचैवसंजातेदृष्ट्वाशय्यांभयावहां। तथापिचतयातत्रकृतंदुःखंमुनीश्वराः।६९। येनैवा
र्पितश्चायंसोवैरक्षांकरिष्यति। यदिवरक्षितश्चैवईश्वरःप्रभुरेवच।७०। मालाकारइवासौवैजातान्युक्तेवियोक्तिच। अतश्चचिंतयाभूय
किंस्यात्कृत्वाविचार्यंच।७१। नचकारतदादुःखंशिवधैर्यमुपागता। पार्थिवांश्चगृहीत्वावैजगामसरसस्तटे।७२। क्षिप्त्वाचपार्थिवां
स्तत्रपरावर्ततसायदा। तदापुत्रसरस्तीरेदृश्यतेस्मतटेतदा।७३। मातरेहिमिलिष्यामिमृतश्चजीवितोह्यहं। तंदृष्ट्वाहर्षितानैवदुःखितान
पुरायथा।७४। तदाशिवश्चसंतुष्टोज्योतिरूपोमहेश्वरः। प्रसन्नोस्मिवरंब्रूहिभक्त्यास्मद्दयातव॥७५। ययाचमारितश्चायंदुष्टया
तवपुत्रकः। तामहंमारयिष्यामित्रिशूलेनवराननं। वरदंज्योतिरूपंसासाष्टांगंप्रणिपत्यच।७६। घुसृणास्तुवरंवव्रेदयालुंचमहेश्वरं। सु
पार्णवउमानाथरक्षणीयस्त्वसामम।७७। अपकारःकृतस्ताभ्यामुपकारःकथंत्वया। क्रियतेहननीयाचपापिष्ठादुष्टकारिणी।७८। तव
दर्शनमात्रेणपातकंनभवतिश्रुतिः। इदानींचैवतांदृष्ट्वातसापंभस्मसाद्व्रजेत्।७९। अपकारिषुयश्चैवह्युपकारंकरोतिच तस्यदर्शन
मात्रेणपापंदूरतरंव्रजेत्।८०। इतिश्रुतंमहादेवभगवद्वाक्यमद्भुतं। तस्माच्चैवसुजनेनक्रियतांचसदाशिव।८१। इत्युक्तेतुतयातत्र
प्रसन्नःपुनरेवच। घुसृणत्रीयतामन्यद्वरामिचहितंतव।८२। सोवाचवचनंश्रुत्वायदिदेयोवरस्त्वया। लोकानांचैवरक्षार्थं
त्वयास्थेयंसदाशिव।८३। मन्नामपूर्वकंनामतवैवास्तुसदाभुवि। तदोवाचशिवस्तत्रतवनाम्नातुमध्यमे।८४। घुसृणेशप्र
सिद्धमेनामसंजायतांशुभं॥ इदंसरस्तुलिंगानामालजंसमजायत।८५। तस्माच्छिवालयंनामप्रसिद्धंभुवनत्र
ये। एतद्भूपप्रसंगेनतीर्थमत्रभविष्यति। इदंब्रह्मसरस्त्वन्देवानामपिदुर्लभं। नभवंतितसंदेहोस्सर्ववर्ण्यशिवालयं गिरि

Dr BHAU DAJI MEMORIAL

आत्रतपार्थंवसमेष्यतियदागिरिं।तस्यास्कनेत्रसंभूताएलगंगेतिनामका।८८।नदीतीर्थमयीतस्यानहिष्यतिसदैवहि।पुष्करायामिती
र्थानिगंगायाःसरितस्तथा।एत्योयथाधिकंनंद्रभाविष्यतिशिवालयं।वनायत्रकिमुक्तेनसर्वयर्वशिवालयः।९०।दिवावसामिसर्वत्ररात्रौ
चवशिवालये।तववंशेशतंचैकंपुरुषावपिसकन्नकन्ते।९१।ईदृशाःपुत्रकावंशेभविष्यंतिनसंशयः।साश्रिकाःसधनाश्चैववह्यायुश्मंतो
विचक्षणाः।९२।विद्यावंतोद्यशूराश्चभुक्तिमुक्तिफलाश्रये।शतमेकोत्तरंचैवभविष्यतिगुणाधिकाः।ईदृशोवंशविस्तारोभविष्यतिसकोत
नः।इत्युक्त्वाचशिवस्तत्रलिंगरूपोभवत्तदा।घृस्णेशइतिख्यातोसरश्चैवशिवालये।इतितेचसमाख्यातंसर्वपापहरंशुभे।९३।आख्या
नंघृस्णेशस्यैतत्यस्यासमुद्भवः।शृण्वंतियेनराभक्त्यासर्वकामान्लभंतिते।९४।किमन्यत्कथयिष्यामिशिवलीलामृतंपरं।
कथ्यतांतन्महाभागाःयेनपूतंजगत्त्रयं।।९५।। ।।इतिश्रीपद्मपुराणेसह्याद्रिखंडेशिवालयमाहात्म्येघृस्णेशाख्यानंनामष
ष्टमोध्यायः।।८।। ।।ऋषयऊचुः।।धन्योसिकृतकृत्योसिसभाग्योसिमहामते।नानासिपरमांसूतकथानांशास्त्रगावतां
।१।अधुनावदनद्गूतेस्थितिर्जाताकथंतयोः।शंभोःप्राप्यकंटकेकिमुकारिमहासती।।२।।सूतउवाच।।शृणुध्वंमुनयःसर्वेघृस्णाचरितं
महत्।ज्योतिरूपमहेशस्यघृस्णावरमुत्तमं।लब्ध्वादृष्टमहात्म्यंतंनमस्कृत्यशिवंतदा।निजाश्रममुपेत्याशुभर्तारंसान्ववेदयत्।४।य
दुक्तंशंभुनासर्वंश्रुत्वातत्सननंतेह।वयंधन्यावयंधन्यावयंधन्याशुचिस्मिते।नवभक्त्याजगन्नाथःकैलासादगतःशिवः।ममाश्र
मेमदीयश्चवंशःप्रतारितः।५।यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी।तावत्कीर्तिरचलाइयंचास्माकमघ्यभोः।६।इत्युक्त्वाप्रययौ
तत्रयत्रेश्वरोमहेश्वरः।पूजासंभारमादायसाकंतासंकृतेनच।नमस्कृत्यमानंदपघृस्णास्फदेहाच्चसकृतःस्तुषा।दृष्ट्वाघृस्णेश्वरंदे
वंप्रणेमुस्तेसदाशिवं।९।शतंचकोटिकंचैवपराकम्यतवैतदा।प्रदक्षिणांतदाशंभोःकारयामासकरादरात्।१०।पूजांकृत्वाप्रयत्नेनस्तुत्वा
नत्वाचभक्तितः।शिवदर्शनमात्रेणवैरंपापंलयंगतं।कदेहायामनिजाताविवाहात्प्राग्ययामला।।।एवंकृत्वासमाश्वस्यमीलिताचप

रस्परं।१२।हित्वाचांतर्मलंतत्रसकृद्वंचलोहितः।हित्वेईदृशंचैवलिंगंतेदृष्ट्वापापैःप्रमुच्यते।१३।स्कंदंसंवर्धतेनित्यंशंकरस्यप्रसादयाश
श्री।।।ऋषयऊचुः।।लिंगानांद्वादशानांचनामानिचपृथक्पृथक्।तथैवतेषांस्थानानिवदस्सूतमहामते।१४।।सूतउवाच।।सौराष्ट्रेसो
मनाथोस्तिश्रीशैल्येमल्लिकार्जुनः।उज्जयिन्यांचमहाकालःॐकारेममलेश्वरः।१५।वैद्यनाथश्चिताभूम्यांनागेशोदारुकावने।सेत
बंधेचरामेशस्त्र्यंबकोगौतमीतटे।वाराणस्यांचविश्वेशोडाकिन्यांभीमशंकरः।केदारोहिमवत्पृष्ठेघृस्णेशःश्चशिवालये।।१६।
श्लोकत्रयमिदंप्रातर्यःपठेद्भक्तिमान्नरः।सर्वान्कामानवाप्नोतिशिवलोकेमहीयते।।ऋषयऊचुः।।धारातीर्थस्यमाहात्म्यंवदसूतविशेषतः
श्रुत्वाकथामृतंदिव्यंतृष्णासंवर्धतेमुहुः।१९।।सूतोवाच।।शृणुध्वंमुनयःसर्वेधारातीर्थंपरंमहत्।यस्यश्रवणमात्रेणसर्वपा
पंव्यपोहति।२०।सह्याद्रिशिखराग्रेणधारासंपततेभुवि।एलगंगोदकस्यैवधारातीर्थंतदुच्यते।२१।हिमालयाद्यथागंगाब्रह्माद्रेश्चा
थगौतमी।विंध्याचलात्तुवैरेवापावनार्थंविनिर्गता।तथैवजगतामर्थासह्याद्रेःपतद्भुवि।२२।जाह्नवीजन्हुनानीतागौतमेनापि
गौतमी।एलएज्ञानथैवेयंएलगंगेतिविश्रुता।२३।बहुनात्रकिमुक्तेनतादृशीयंमहानदी।सायत्रपततेतत्रतंधारातीर्थंतदुच्यते।२४
अन्यत्स्यतुतीर्थस्यमाहात्म्यंश्रुतयांद्विजाः।यस्यनास्तिसकृतःकन्यायत्नतस्तेनतत्रवै।२५।स्त्रियासाकंप्रकर्तव्यंस्नानंधाराजले
नच।हांपत्यंगुरुवर्यस्यसंपूज्यचविदद्विजाः।२६।भाविनीसंततिर्यस्याःधारापतातिमस्तके।नचेत्तुविपरीतासाभवत्येवनसंशयः।२७
श्रावणेभौमवारेचपुण्यंकोटिगुणंभवेत्।इतिसंक्षेपतोनूनंधारातीर्थंमयातुवः।२८।कथितंस्वर्णजालेशंततोगच्छेत्प्रयत्नतः।हेमाब्ज
कस्कैर्गौर्यायस्पूजितंलिंगमुत्तमं।स्वर्णजालेश्वरंनामप्रसिद्धंयत्शिवालये।इतिविश्वसमाख्यातंमयासंक्षेपतःखलु।३०।शिवाल
यस्यमाहात्म्यंसर्वकामफलप्रदं।यच्छ्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात्।३१।शृण्वंतियेनराःनूनंशिवभक्त्यापठंतिवा।भुक्त्वाभो
गाननेकांश्चपरेमेतेशिवसन्निधौ।३२।लभंतिसततंविप्राःसत्यंसत्यंनसंशयः।श्रोतव्यमिदमद्भुताख्यानंसमस्तध्यायामकंश्रि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वं।३३। षष्टिर्वर्षसहस्राणिशिवलोकेमहीयते।तदंतेतत्रपुनःप्राप्यराजाभवतिभूतले।३४।एतस्यश्रवणादेवपुत्रार्थीपुत्रमाप्नुया
त्।धनार्थीलभतेवित्तंकांतार्थी२चापिसत्स्त्रियां।३५। संजीवेद्यश्चाल्पायुपूर्णंतुशरदांशतं।यंयंकामंसमुद्दिश्यश्रृणुयात्तुत
थापठेत्।३६। संप्राप्यचनरस्तंतमंतेशिवपदंव्रजेत्।इत्युक्त्वास्कंदजस्तेभ्योशिवध्यानपरोप्यभूत्।३७। तेपिसर्वेऋषिव
राःश्रुत्वानत्वायस्कंदजं।भूषणैश्चस्रक्वस्त्रैश्चपूजयामासुरादरात्।३८।ब्रह्मानंदमयंसर्वंतदाभून्नैमिषंपरं।ननृतुस्तेषपर्यंस
वैवर्णयंतःशिवालयं।३९। ब्रह्मानंदमयंसर्वंतदाभून्नैमिषंवनं॥३०॥ ॥१॥इतिश्रीपद्मपुराणेसह्याद्रिखंडेशिवाल
यमाहात्म्येधारातीर्थवर्णनंश्रवणफलश्रुतिकथनंनामसप्तमोध्यायः॥७॥ शाकेबाणशराद्रिचंद्रनियुतेश्रीनंदनेवत्सरेमाघस्या
सितपक्षकेशशितिथौजीवस्यवारेतथा।श्रीमद्राघवसूनुनाविलिखितंग्रस्थणाख्यालीलामृतंज्ञेयंशिष्टगणैस्तथेष्टफलदंपाम्यं
गजस्नावनं।१॥ शाके१७।२५ नंदननामसंवत्सरेमाघवद्यपंचम्यांशुक्लोपनामकेनपांडुरंगात्मजोराघवस्तस्यसूनु
नाएलापुरस्थेनेदंशिवालयमाहात्म्यंसमाप्तिमितिज्ञेयं बृहस्पतिसमोवक्ताबुध्योशनसामसः लिखन्निवमु
ह्यतेसोपिकिंपुनर्मुषिमानवाः१। श्रीमत्परमेश्वरार्पणमस्तु॥ ॥शुभंभवतु॥ ॥श्रीरस्तु॥